ॐ श्रीगणेशाय नमः ततः कृतस्नानादि संध्यादिः शुचिः शुक्लदिवासाः पादौ प्रक्षाल्याचम्य श्राद्धदेशमागच्छे
त् ततः स्वयं पाकं कुर्यात् सपिंडस्त्रीद्वारा वा पाचयेत् ततः पाके कृते हस्तादीनि विधाय पुनराचम्य
प्राङ्मुख उपविशेत् ॐ यज्ञपुरुषाय नमः शंखचक्रधरं देवं द्विभुजं पीतवाससं प्रारंभे क
र्मणां विप्र पुंडरीकं स्मरेत् हरिं अन्यकृते पाके सिद्धमिति पृच्छेत् ॐ नमो नमस्ते गो
विंद पुराणपुरुषोत्तम इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिश ॐ प्राच्यै नमः ॐ अवा
च्यै नमः ॐ उदीच्यै नमः ॐ प्रतीच्यै नमः इति मंत्रेण सर्षपान् विकरेत् ॐ अपवित्रः पवित्रो
वा सर्वावस्थां गतोपि वा यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॐ पुंडरीकाक्षः पुना
त्विति पठित्वा कुशत्रयजलैः श्राद्धीय वस्तूनि सिंचेत् ततः कुशत्रयतिलजलान्यादाय
ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौ अमुकगोत्रस्य पितुरमुकशर्म्मणः सांवत्स
रिकैकोद्दिष्टश्राद्धमहं करिष्ये इति संकल्पं कुर्यात् ततो नित्यक्रियः गायत्रीं त्रिर्ज
पित्वा ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो

स्वंद्रीकृतास्त्वेवमनोभवस्य ५१ मनोज्ञगंधंसहकारभंगंपुराणसीधुंनवपाटलंच संब
तीकाम

वीतवसामितेस्वधेतिगंधादीन् दद्यात् ततोजलेन भोजनपात्रासनयोरग्रहाद्दिशंमंडलेकृत्वा सयंजवमन्त्रं किंचिद्दत्त्वा ग्रा
मकृत्य ओं इदमन्नमेतद्भूस्वामिपितृभ्योनमः इतिमन्त्रवाक्येनान्नंदद्यात् ततः सिद्धमन्नमन्नंरजताविपात्रस्थंकरामा
मादायपितृरेध्यायन्नं इदमन्नंपरिविषकुर्यात् ततः पूर्वाहारदानमन्त्रं परिविषयथासंभवंजलं तंच पावांतरा
स्थातेनाचमीयान्नंमधुनाभिधार्य ओंमधुवाताऋतायतेमधुक्षरंतिसिंधवः माध्वीन्नः सन्त्वोषधीर्मधुनक्त
मुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तुनः पितामधुमान्नोवनस्पतिः मधुमान्अस्तुसूर्यः माध्वीर्गावोभवन्तुनः
मधुमधुमधु इतिजपित्वापात्रमालभेत् ततः सव्येनहस्तेनपात्रंपश्चिमभागेनस्पृशान् तदुपरिगतदक्षिणह
स्तेनाधोमुखेनपूर्वभागपात्रंस्पृशन् ओं पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वा
हा इदं विष्णुर्विचक्रमे त्रेधानिदधेपदं समूढमस्यपांसुरे ओं कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा वामेन
पाणिनापात्रमस्पृशन्नेनदक्षिणेनान्नमुत्सृजेत् ओं इदमन्नं इमा आपः इदमाज्यं इदं हविरितिपठित्वाजनेघृतेपुनरे
वांगुष्ठं निक्षिप्य ओं अपहता असुरा रक्षांसिवेदिषद इत्यन्नोपरितिलान्विकीर्य मोटकादीन्यादाय ओं
अद्यामुकगोत्रपितृपितरमुकशर्मन्नेकोद्दिष्टश्राद्धे एतत्तेन्नंसोपकरणं स्वधेतिमन्त्रमुत्सृजेत् ततोवा
महस्तमन्नमुत्सृज्य ओं अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् तत्सर्वमच्छिद्रमस्तु कुशोदकंपविष्टगाय
त्रीजपेत् मधुवाताइतिऋचंपठेत् नमस्कुर्याद्विप्रपादनमस्तेनेकचक्रायनमः पिनाकहस्तायवज्रहस्ता

नमः इति त्रिर्जपेत् ततोऽपसव्येन दक्षिणाभिमुखः पातितवामजानुर्मोदकादीन्यादाय ॐ अमुकगोत्र पितरमुकशर्मन्
सांवत्सरिकैकोद्दिष्टश्राद्धे इदमन्नं ते स्वधेति पूर्वोपकल्पितमोदकरूपमन्नं ... ततस्तत्प्रोक्षितं दक्षिणाग्रं
पितृतीर्थेनोत्सृजेत् ॐ अपहता असुरा रक्षांसि वेदिषद इति भोजनपात्रे तिलान्विकीर्य ॐ आयन्तु
नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मानिति जपेत्
ततोऽर्घकरणार्थं पुटकादौ दक्षिणाग्रं पवित्रं धृत्वा ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छि
द्रेण पवित्रेण सूर्यस्य रश्मिभिः ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इति जलं तिलो
ऽसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहेति तिलान्प्रक्षिप्य
गंधपुष्पे तूष्णीं क्षिपेत् ततोऽर्घपात्रं वामहस्ते कृत्वा भोजनपात्रे पवित्रं धृत्वा तदुपरि कुशान्तरेण दत्वा ॐ या दिव्या आ
पः पयसा संबभूवुर्या अन्तरिक्षा उत पार्थिवीर्या हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शं स्योनाः सुहवा भवन्तु इ
ति पठित्वा ॐ अद्यामुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एषोऽर्घस्ते स्वधेति पवित्रोपरि जलं ॥
यथापतितं एवमुत्सृजेत् ततः पवित्रयुतं तदर्घपात्रमवशिष्टजलयुतं भोजनवामभागे पितृस्थानमसीति न्यु
ब्जीकुर्यात् तच्च दक्षिणादानपर्यन्तं नोच्चालयेत् श्राद्धे रते ततो मोदकतिलजलान्यादाय ॐ अद्यामुकगोत्र पि
तरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एतानि गंधाद्यानि गंधपुष्पधूपदीपताम्बूलाद्यलंकाराच्छादनानि

त् ॐ अद्यामुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एतत्ते पिण्डः स्वधा इति पिण्डं कुशोपरि पिण्डं दद्यात्
ततः कुशमूले हस्तं निमार्ज्य प्रोक्ष्य सव्यं कृत्वा द्विराचामेत् हरिं स्मृत्वा अपसव्यं कृत्वा दक्षिणाभिमुखः ॐ अत्र पितर्मा
दयध्वं यथाभागमावृषायध्वं इति पठित्वा उत्तराभिमुखीभूय [illegible] नियम्य पुनर्दक्षिणाभिमुखो भवन् ॐ अमी
मदन्त पितरो यथाभागमावृषायिषत ततः पूर्ववत् शिष्टजलं [illegible] अवनेजनपात्रमादाय ॐ अद्यामुकगोत्र पित
रमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे पिण्डे अत्र प्रत्यवनेनिक्ष्व ते स्वधा इति पिण्डोपरि प्रत्यवनेजनं दद्यात्
ततो नीवीं विस्रस्य सव्येनाचम्य अपसव्यं कृत्वा वामेन पाणिना [illegible] दक्षिणाकरं कृत्वा ॐ नमस्ते
पितरो रसाय नमस्ते पितरः शोषाय नमस्ते पितरो जीवाय नमस्ते पितरः स्वधायै नमस्ते पितरो घोराय नमस्ते पि
तरो मन्यवे नमस्ते पितरः पितरो नमस्ते गृहान्नः पितरो दत्त [illegible] नमस्ते पितरो देष्म इति पठित्वा एतद्वः पितरो वास इति पि
ण्डोपरि दद्यात् ततो मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे
पिण्डे [illegible] स्वधा [illegible] ततः पितरमुकशर्मन् पिण्डे [illegible] पुष्पधूपदीपताम्बूलानि दद्यात्
ततः शिवा आपः सन्त्विति जलं ॐ सौमनस्यमस्त्विति पुष्पं ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् भाज
नपात्रे क्षिपेत् ततः मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितरमुकशर्मणः सांवत्सरि
कैकोद्दिष्टश्राद्धे [illegible] जलधारा [illegible] दद्यात् ततः

हुत्वेनमः ॐ रुचि रुचितिनानिकीर्य्य इति च ३ खिरुसमीपे दत्वा गंकुशान्यमालीर्य्य जलेन सिक्ता किंचिद
ग्रंमधृतं तिलजलं सिक्तमादाय ॐ कुत्र निर्दग्धा ये जीवा ये प्रदग्धा कुले मम: भूमौ दत्तेन तृप्यंतु तृप्ता
यांतु परां गतिमिति भूमौ निक्षिप्य कलशं हि दिशपकुशोपरि अर्घं विकिरेत् ततः सव्यं कृत्वा ॥ चमसहरिक्षवाना
पत्नीमधुवाताहि जपेत् ततोऽपसव्यं कृत्वा हस्तमात्रं चतुरंगुलोच्छ्रितं दत्वा एकं पिंडं कार्य्यं प्रादे
शमात्रं परिमाय दर्भपिंजुलं दक्षिणाग्रं कृत्वा नीध्मेनोपरिमाणाय ॐ अपहता इति प्रादेशमात्र
मूलं दर्भपिंजुली ... दक्षिणाग्रं दिशि निक्षिपेत् ततः ॐ ये रूपाणि प्रतिमुंचमाना असुराः सन्तः स्वधया चरं
ति परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात् प्रणुदात्यस्मात् इत्यंगारं भ्रामयित्वा ... दक्षिणस्यां क्षिपेत्
ततस्तत्र ... मूलकुशान्यमालीर्य्य सव्यं कृत्वा ॐ देवताभ्य इति त्रिर्जपेत् ततोऽपसव्यं कृत्वा तिल
जलगंधपुष्पाणि पुटके कृत्वा पुटकं वामहस्ते कृत्वा मोटकेन तिलजलान्यादाय ॐ अद्यामुकगोत्र
पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे पिंडस्थाने अत्रावनेनिक्ष्व ते स्वधेति ... अवनेजनोपरि
अवनेजनं दत्वा किंचित्तिलजलं पुटके वामहस्ते धारयेत् ततस्तिलजलघृतमधुसंयुतं पिंडं वि ...
पमं निर्माय मधुघृताभ्यामभिधार्य मोटकेन तिलजलसहितमादाय सव्यापसव्येन दक्षिणहस्ते

सव्यं कृत्वा दक्षिणाभिमुखः ॐ अघोरः पिताः अस्त्विति पिंडोपरि पूर्वापाजलधारां दद्यात् ततः पूर्ववत्सव्यं कृ
तांजलिः सुमनाः ॐ गोत्रं नो वर्द्धतां दातारो नोभिवर्द्धतां वेदः संततिरेव च श्रद्धा च नो माव्यगमद्बहु
देयं च नोस्त्विति अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः संतु मा च याचिष्म कंचन
एताः सत्याशिषः सन्त्वित्याशीःप्रार्थनं कृत्वा अपसव्यं कृत्वा सपवित्रं कुशत्रयं दक्षिणाग्रं पिंडो
परि धृत्वा ॐ ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन् इति स
पवित्रकुशोपरि दक्षिणाभिजलधारां दद्यात् ततो नमस्कार्य पिंडमाघ्राय उत्थापयेत् पिंडाधारकु
शान् स्तकेचवह्नौ क्षिपेत् अर्घपात्रमुत्तानीकृत्य दक्षिणां दद्यात् मातृकादीत्यादाय ॐ अद्य अमुकगोत्र
स्य पितुरमुकशर्मणः कृतैतन्नांदीवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगो
त्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे यदि उपस्थितं रजितं तस्यामहारक्तिकापरिमितं चंद्र
दैवतमित्येवमादि वाक्यं कर्त्तव्यं इदं दैवदंनदातव्यमिति विशेषः ततः ॐ अभिरम्यतामिति विसर्जनम्
ततः सव्यं कृत्वा देवताभ्य इति जपेत् ततोऽपसव्यं कृत्वा रक्षादीपं निर्वाप्य हस्तौ पादौ प्रक्षाल्य सव्ये
नाचम्य प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः वि